"पाषाणैरिष्टकाभिर्व्वा बद्धकूपा हृहत्तरा ।
ससोपाना भवेद्वापी तज्जलं वाप्यमुच्यते ॥
वाप्यं वारि यदि क्षारं पित्तकृत् कफवातहृत् ।
तदेव मिष्टं कफकृत् वातपित्तहरं भवेत् ॥"
अथ कौपस्य लक्षणं गुणाश्च ।
"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः ।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौप्यमुच्यते ॥
कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु ।
तत् क्षारं कफवातघ्नं दीपनं कफकृत् परम् ॥"
अथ चौण्ड्यस्य लक्षणं गुणाश्च ।
"शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् ।
लतावितानसंछन्नं चौण्ड्यमित्यभिधीयते ॥
अश्मादिभिरबद्धं यत्तत् चौण्ड्यमिति चापरे ।
तत्रत्यमुदकं चौण्ड्यं मुनिभिः समुदाहृतम् ॥
चौण्ड्यं वह्निकरं नीरं रूक्षं कफहरं लघु ।
मधुरं पित्तहृद्दर्घ्यं पाचनं विशदं स्मृतम् ॥"
अथ पाल्वलस्य लक्षणं गुणाश्च ।
"अल्पं सरः पल्वलं स्यात् यत्र चन्द्रक्षगे रवौ ।
न तिष्ठति जलं किञ्चित् तत्रत्यं वारि पाल्वलम् ॥
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥"
अथ विकिरस्य जलस्य लक्षणं गुणाश्च ।
"नद्यादिनिकटे भूमिर्य्या भवेद्वालुकामयी ।
उद्भाव्यते ततो यत्तु तज्जलं विकिरं विदुः ॥
विकिरं शीतलं स्वच्छं निर्द्दोषं लघु तत् स्मृतम् ।
तुवरं स्वादु पित्तघ्नं क्षारं तत् पित्तलं मनाक् ॥"
अथ कैदारस्य लक्षणं गुणाश्च ।
"केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरु दोषकृत् ॥"
अथ वृष्टिजलस्य लक्षणं गुणाश्च ।
"वार्षिकं तदहर्वृष्टं भूमिष्ठमहितं जलम् ।
त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ॥"
अथ हेमन्तादिकालविशेषे विहितो जलविशेषः ।
"हेमन्ते सारसं तोयं ताड़ागं वा हितं स्मृतम् ।
हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ॥
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम् ।
न देयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ॥
विषवद्गगट्टच्छायां पत्राद्यैर्दूषितं यतः ।
औद्भिदं वान्तरीक्षं वा कौपं वा प्रावृषि स्मृतम् ॥
शस्तं शरदि नादेयं नीरमंशूदकं परम् ।
दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ॥
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥"
रविकरैर्जुष्टमित्युक्ते दिवापदं समस्तदिवसप्राप्त्यर्थं शीतकरांशुभिर्जुष्टमित्युक्ते निशीतिपदं समस्तरात्रिप्राप्त्यर्थम् । अन्यच्च ।
"शरदि स्वच्छमुदयादगस्त्यस्याखिलं हितम् ॥"
दृद्धसुश्रुतस्तु ।
"पौषे वारि सरोजातं माघे तत्तु तड़ागजम् ।
फाल्गुने कूपसम्भूतं चैत्रे चौण्ड्यं हितं मतम् ॥
वैशाखे नैर्झरं नीरं ज्यैष्ठे शस्तं तथौद्भिदम् ।
आषाढ़े शस्यते कौपं श्रावणे दिव्यमेव च ॥
भाद्रे कौपं पयः शस्तमाश्विने चौण्ड्यमेव च ।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते ॥"
अथ जलस्य ग्रहणकालः ।
"भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
शीतत्वं निर्म्मलत्वञ्च यतस्तेषां महान् गुणः ॥"
अथ जलस्य पाने विधिः ।

"अत्यम्बुपानान्न विपच्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्म्मुहुर्व्वारि पिबेदभूरि ॥"

अथ शीतलजलपानस्य विषयाः ।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमे श्रमे विदग्धेऽन्ने तमके वमथौ तथा ।
ऊर्द्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
अथ तन्निषेधः ।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ।
आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीताम्बु परिवर्ज्जयेत् ॥"
अथाल्पजलपानस्य विषयाः ।
"अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ।
मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे ।
व्रणे च मधुमेहे च पिबेत् पानीयमल्पकम् ॥"
अथ जलपानस्यावश्यकता ।
"जीवानां जीवनं जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सुश्रो न क्वचित् वारि वार्य्यते ॥"
हारीतश्च ।
"तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
अतः सर्व्वास्ववस्थासु न क्वचित् वारि वारयेत् ॥"
अथ प्रशस्तं जलम् ।
"अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम् ।
अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते ॥"
अथ निन्दितं जलम् ।
"पिच्छिलं कृमिलं क्लिन्नं पर्णशैवालकर्द्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥
कलुषं छन्नमम्भोजपर्णनीलीतृणादिभिः ।
दुर्द्दर्शनमसंस्पृष्टं सौरचान्द्रमसांशुभिः ॥
अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्त्तव्यं सर्व्वदोषप्रकोपणम् ॥
तत् कुर्य्यात् स्नानपानाभ्यां तृष्णाध्मानोदरज्वरान् ।
कासाग्निमान्द्याभिष्यन्दिकण्डूगण्डादिकांस्तथा ॥"
अथ दुष्टजलस्य निर्द्दोषीकरणोपायः ।
"निन्दितं चापि पानीयं क्वथितं सूर्य्यतापितम् ।
सुवर्णं रजतं लोहं पाषाणं सिकतां मृदम् ॥
भृशं संताप्य निर्व्वाप्य सप्तधा साधितं तथा ।
कर्पूरजातिपुन्नागपाटलादिसुवासितम् ॥
शुचिसान्द्रपटस्रावैः क्षुद्रजन्तुविवर्ज्जितम् ।
स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोषवर्ज्जितम् ॥
पर्णमूलबिसग्रन्थिमुक्ताकनकशैवलैः ।
गोमेदेन च वस्त्रेण कुर्य्यादम्बुप्रसादनम् ॥"
अथ पीतस्य जलस्य पाकावधिः ।

"आमं जलं जीर्य्यति याममात्रं
तदर्द्धमात्रं शृतशीतलञ्च ।
तदर्द्धमात्रं तु शृतं कदुष्णं
पयःप्रपाकेऽवधिरेष उक्तः ॥"

इति भावप्रकाशे वारिवर्गः ॥

अथ जले भगवत्पूजाविधिः ।
"उत्तापेऽर्कांशुतो जाते शीतलेन सुगन्धिना ।
जलेन पूरिते पात्रे श्रीकृष्णमुपवेशयेत् ॥
नित्यार्च्चाविधिनाभ्यर्च्य सायं सन्ध्यामुपास्य च ।
देवं सिंहासने नीत्वा गन्धादिभिरथार्च्चयेत् ॥
नीराज्य देवं सर्व्वेभ्यो दत्त्वा तीर्थं भजेत् स्वयम् ।
द्वादश्यान्तु विशेषेण रात्रौ तोयस्थमर्च्चयेत् ॥"
तन्माहात्म्यं यथा, गारुड़े ।
"स्वर्णपात्रेऽथवा रौप्ये ताम्रे वा मृण्मयेऽपि वा ।
तोयस्थं योऽर्च्चयेद्भक्त्या शालग्रामसमुद्भवम् ॥
चक्राङ्कितं वा भूपाल ! निवृत्ते मधुमाधवे ।
प्रतिमां स महाभागस्तस्य पुण्यमनन्तकम् ॥
यावद्धराधरो लोके यावच्चन्द्रदिवाकरौ ।
तावत्तस्य कुले कश्चिन्न भवेन्नृप ! नारकी ॥
तस्माज्ज्यैष्ठे सदा भूप ! तोयस्थं पूजयेद्धरिम् ।
वीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवम् ॥
कृतैः सुशीतलैस्तोयैस्तुलसीदलवासितैः ।
शुचिशुक्रगते काले येऽर्च्चयिष्यन्ति केशवम् ॥
जलस्थं विविधैः पुष्पैर्म्मुच्यते यमयातनात् ॥
जलसख्यो यतो विष्णुर्जलशायी जलप्रियः ।
तस्माद्ग्रीष्मे विशेषेण जलस्थं पूजयेद्धरिम् ॥
नीरमध्यस्थितं कृत्वा शालग्रामसमुद्भवम् ।
योऽभ्यर्च्चयेन्महाभक्त्या स भवेत् कुलपावनः ॥
कर्किराशिगते सूर्य्ये मिथुनस्थे विशेषतः ।
येनार्च्चितो हरिर्भक्त्या जलमध्ये महीपते ! ॥
द्वादश्यान्तु विशेषेण जलस्थं जलशायिनम् ।
योऽभ्यर्च्चयेत् कृतं तेन यज्ञकोटिशतं भुवि ॥
पात्रे गन्धादिकं कृत्वा यः क्षिपेद्गरुड़ध्वजम् ।
द्वादश्यां पूजयेद्रात्रौ मुक्तिभागी भवेन्नरः ॥"
किञ्च ।
"घनागमे प्रकुर्व्वन्ति जलस्थं ये जनार्द्दनम् ।
ये नरा नृपतिश्रेष्ठ ! तेषां वै नरकं ध्रुवम् ॥"
"तथैवात्युष्णसमये कालिन्द्यादौ विशेषतः ।
सम्पादयेद्भगवतो जलक्रीड़ामहोत्सवम् ॥"

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

जलः, त्रि, (जलति आच्छादयति विनाशयति वा ज्ञानं बुद्धिप्रतिभां वेति । जल + अच् ।) जड़ः । इति मेदिनी । ले, १८ ॥ (यथा, काशीखण्डे । २६ । ६६ ।
"जाड्यविध्वंसनकरी जगद्योनिर्ज्जलाविलां ॥"
"जलानां जड़ानामज्ञानानामित्यर्थः । आविलेव कलुषितेव आस्तेवेति वा ।" इति तट्टीका ॥)

जलकण्टकः, पुं, (जले जातः कण्टकः । कण्टकान्वितत्वादेवास्य तथात्वम् ।) शृङ्गाटः । पानी-